# ॥ परब्रह्म-प्रातः स्मरण-स्तोत्रम् ॥

प्रातः स्मरामि हृदि संस्फुरदात्मतत्वं
सच्चित् सुखं परमहंसगतिं तुरीयम्।
यत् स्वप्नजागरसुषुप्तिमवैति नित्यं
तद् ब्रह्म निष्कलमहं न च भूतसन्धः ॥ १ ॥

प्रातर्भजामि मनसा वचसामगम्यं
वाचो विभान्ति निखिला यदनुग्रहेण।
यं नेति नेति वचनैर्निगमा अवोचं
स्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥ २ ॥

प्रातर्नमामि तमसः परमर्कवर्णं
पूर्णं सनातनपदं पुरूषोत्तमाख्यम्।
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्वां भुजङ्गम इव प्रतिमासितं वै ॥ ३ ॥

श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम्।
प्रातः काले पठेद्यस्तु स गच्छेत्परमं पदम् ॥ ४ ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Parabrahma_Pratah_Smaranam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits